न श्रीस्त्यजति रक्ताक्षं नार्थः कनकपिङ्गलम् ।
दीर्घबाहुं न चैश्वर्य्यं न मांसोपचितांसकम् ॥
कदाचिद्दन्तुरो मूर्खः कदाचिल्लोमशः सुखी ।
कदाचित्तुन्दिलो दुःखी कदाचिच्चञ्चला सती ॥
नेत्रस्नेहेन सौभाग्यं दन्तस्नेहेन भोजनम् ।
त्वक्स्नेहेन चैश्वर्य्यं पादस्नेहेन वाहनम् ॥
अकर्म्मकठिनौ हस्तौ पादावध्वनि कोमलौ ।
यस्य पाणितलौ रक्तौ तस्य राज्यं विनिर्द्दिशेत् ॥
दीर्घलिङ्गेन दारिद्र्यं स्थूललिङ्गेन निर्धनः ।
कृशलिङ्गेन सौभाग्यं ह्रस्वलिङ्गेन भूपतिः ॥
रेखाभिर्बहुभिर्दुःखं स्वल्पाभिर्धनहीनता ।
रक्ताभिः श्रियमाप्नोति कृष्णाभिर्लोकपूजितः ॥
अङ्गुष्ठोदरमध्ये तु यवो यस्य विराजितः ।
उन्नतं भोजनं तस्य शतं जीवति मानवः ॥
अङ्कुशं कुलिशं छत्त्रं यस्य पाणितले भवेत् ।
ऐश्वर्य्यञ्च विनिर्द्दिष्टमशीत्यायुर्भवेद्ध्रुवम् ॥
धनुर्यस्य भवेत् पाणौ पङ्कजं वाथ तोरणम् ।
तस्यैश्वर्य्यञ्च राज्यञ्च अशीत्यायुर्भवेद्ध्रुवम् ॥
कनिष्ठातर्ज्जनीं यावत् रेखा भवति चाक्षता ।
विंशत्यब्दाधिकशतं नरा जीवन्त्यनामयाः ॥
कनिष्ठामध्यमां यावत् रेखा भवति चाक्षता ।
शताब्दं वाथ वाशीतिर्नरो जीवेन्न संशयः ॥
कनिष्ठानामिकायाश्चेत् रेखा भवति चाक्षता ।
षष्टिं पञ्चाशदब्दं वा नरा जीवन्त्यसंशयम् ॥
रेखया भिद्यते रेखा स्वल्पायुश्च भवेन्नरः ।
कनिष्ठायां स्थिता रेखा संख्या यावतिका स्मृता ।
तावती पुरुषाणान्तु नारी भवति निश्चितम् ॥
करमध्यगता रेखा ध्रुवा ऊर्द्ध्वम्भवेद्यदि ।
नृपो वा नृपतुल्यो वा चिरं ख्यातोऽर्थवान् भवेत् ॥

मत्स्यपुच्छप्रकीर्णेन विद्यावित्तसमन्वितः ।
पितामहस्य वा किञ्चित् धनञ्च लभते ध्रुवम् ॥
मध्यमायां यदि यवा दृश्यन्तेऽत्यन्तशोभनाः ।
तदान्यसञ्चितं वित्तं प्राप्नोत्यङ्गुष्ठके यवे ॥
यस्याथ चक्रमङ्गुष्ठे यवादूर्द्ध्वञ्च दृश्यते ।
तदा वै पामरादीनामर्ज्जितं धनमाप्नुयात् ॥
तर्ज्जन्यामथ चक्रञ्च मित्रद्वारा धनम्भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
मध्यमायां स्थिते चक्रे देवद्वारा धनं लभेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
अनामायां भवेत् चक्रं सर्व्वद्वारा भवेद्धनम् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥
कनिष्ठायां भवेच्चक्रं वाणिज्येन धनं भवेत् ।
तेनैव विपरीतन्तु व्ययो भवति निश्चितम् ॥ * ॥
ललाटे दृश्यते यस्य चक्ररेखाचतुष्टयम् ।
अशीत्यायुः समाप्नोति पञ्चरेखाः शतं समाः ॥
यस्योन्नतं ललाटञ्च ताम्रकर्णश्च दृश्यते ।
रेखाहीनश्च कण्ठश्च स चोन्मत्तो महीं भ्रमेत् ॥
यस्य जिह्वा भवेद्दीर्घा नासाग्रं लेढि सर्व्वदा ।
भोगी भवति निर्व्वाणः पृथ्वीं भ्रमति सर्व्वदा ॥
दन्ताश्च विरला यस्य नीचवन्नीचकर्म्मकृत् ।
प्रगल्भो दन्तुरः सत्यं वेदान्तपारगो भवेत् ॥”

प्रकारान्तरम् ।
“दन्ताश्च विरला यस्य गण्डे कूपोऽपि जायते ।
परस्त्रीरमणो नित्यं परवित्तेन वित्तवान् ॥
दीर्घलिङ्गे च सौभाग्यं सूक्ष्मलिङ्गे नृपो भवेत् ।
वक्रास्यकठिनैर्लिङ्गैः प्रमाणान्निर्गतः सदा ॥
रमते च सदा दास्यां निर्धनो भवति ध्रुवम् ।
कृशलिङ्गेन सूक्ष्मेण रक्तवर्णेन भूपतिः ।
बहुस्त्रीरमणो नित्यं नारीणां वल्लभो भवेत् ॥
कृशलिङ्गेन रक्तेन लभते चोत्तमाङ्गनाम् ।
राज्यं सुखञ्च दिव्यायाः कन्यकायाः पतिर्भवेत् ॥
यस्य पादतले पद्मं चक्रं वाप्यथ तोरणम् ।
अङ्कुशं कुलिशं वापि स राजा भवति ध्रुवम् ॥
कृशनिर्लोमशा ये स्युः केकराक्षाः कुचेलकाः ।
कातरा बालजिह्वाश्च ते दरिद्रा न संशयः ।
कपिला मलिनाङ्गाश्च ह्रस्वाश्चैव दृढनखाः ॥
कृशातिदीर्घा मनुजास्ते दरिद्रा न संशयः ।
चिबुके श्मश्रुशून्या ये निर्लोमहृदयाश्च ये ।
ते धूर्त्ता नैव सन्देहः समुद्रवचनं यथा ॥
सूचीमुखा भग्नपृष्ठाः कृष्णदन्ताः कुचेलकाः ।
वक्रनासा वक्रनासास्ते नरा दुष्टमानसाः ॥
दयालवश्च दातारो रूपवन्तो जितेन्द्रियाः ।
परोपकारिणश्चैव तेऽपूर्व्वा मानवाः स्मृताः ॥”
इति सामुद्रके पुरुषलक्षणम् ॥ * ॥
दानवीरदयावीरयुद्धवीरसत्यवीरसंज्ञकपुरुषलक्षणन्तु पुरुषपरीक्षाग्रन्थे द्रष्टव्यम् ॥

पूर्णः, त्रि, (पूर्य्यते स्मेति । पॄ पूरि वा + क्तः । “वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ।” ७ । २ । २७ । इति इड़भावो निपात्यते च ।) पूरितः । सकलः । इत्यमरः । ३ । १ । ६८ ॥ (यथा, पञ्चदश्याम् । ७ । ७७ ।
“तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ।
पूर्णानन्दैकरूपेण प्रत्यग्बोधोऽवतिष्ठते ॥”)
शक्तः । इति मेदिनी । णे, २२ ॥ स्वीयसुखेच्छावदन्यः । इति गदाधरभट्टाचार्य्यः ॥ (प्रधायाः पुत्त्रभेदः । यथा, महाभारते । १ । ६५ । ४७ ।
“सिद्धः पूर्णश्च बर्हो च पूर्णायुश्च महायशाः ॥”
नागभेदः । यथा, महाभारते । १ । ५७ । ५ ।
“कोटिशो मानसः पूर्णः शलः पालो हलीमकः ॥”)

पूर्णकः, पुं, (पूर्ण + “संज्ञायां कन् ।” ५ । ३ । ७५ । इति कन् ।) स्वर्णचूड़पक्षी । इति मेदिनी । के, १२५ ॥ (देवयोनिविशेषः । यथा, महाभारते । ७ । ५५ । ४ ।
“नटनर्त्तकगन्धर्व्वैः पूर्णकैर्वर्द्धमानकैः ।
नित्योद्योगैश्च क्रीड़द्भिस्तत्र स्म परिहर्षिताः ॥”)

पूर्णकुम्भः, पुं, (सलिलादिभिः पूर्णः कुम्भः ।) जलपूरितघटः । तत्पर्य्यायः । भद्रकुम्भः २ । इत्यमरः । २ । ८ । ३२ ॥ (यथा, मनुः । ११ । १८७ ।
“प्रायश्चित्ते तु चरिते पूर्णकुम्भमपां नव ।
तेनैव सार्द्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये ॥”)
पूर्णकलसादिश्च । इति भरतः ॥ (ग्रथिताङ्गुलिभ्यां हस्ताभ्यां परशिरसः पीड़नं पूर्णकुम्भः । इति नीलकण्ठः ॥ यथा, महाभारते । २ । २३ । १४ ।
“बाहुपाशादिकं कृत्वा पादाहतशिरावुभौ ।
उरोहस्तं ततश्चक्रे पूर्णकुम्भौ प्रयुज्य तौ ॥”)

पूर्णकोष्ठा, स्त्री, (पूर्णं कोष्ठमस्याः ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

पूर्णपात्रं, क्ली, (पूर्णञ्च तत् पात्रञ्चेति नित्यकर्म्मधारयः ।) वस्तुपूर्णपात्रम् । वर्द्धापकः । इति मेदिनी । रे, २८४ ॥ उत्सवकाले हर्षात् गृहीतवस्त्रालङ्कारादि । तत्पर्य्यायः । पूर्णालकम् २ । यथा,—
“हर्षादुत्सवकाले यदलङ्कारांशुकादिकम् ।
आकृष्य गृह्यते पूर्णपात्रं पूर्णालकञ्च तत् ॥”
इति जटाधरः ॥
(यथा, अनर्घराघवे । ३ । ४५ ।
“शाम्भवं चापमारोप्य योऽस्मानानन्दयिष्यति ।
पूर्णपात्रमियं तस्मै मैथिली कल्पयिष्यते ॥”)
होमकर्म्मणि ब्रह्मदक्षिणा । यथा, गोभिलेनापि दर्शादियागमभिधाय पूर्णपात्रो दक्षिणा ब्रह्मण इत्यादिरुक्तम् । पात्रत्वेऽपि पुंस्त्वं छान्दसम् । तस्य प्रमाणन्तु गृह्यसंग्रहे यज्ञपार्श्वपरिशिष्टयोः ।
अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम् ।
पुष्कलानि च चत्वारि पूर्णपात्रं विधीयते ॥
अत्र षट्पञ्चाशदधिकशतद्वयमुष्टिमितं पूर्णपात्रम् । असम्भवे तु छन्दोगपरिशिष्टम् ।
यावता बहुभोक्तुस्तु तुष्टिः पूर्णेन जायते ।
नावरार्द्धमतः कुर्य्यात् पूर्णपात्रमिति स्थितिः ॥”
इति संस्कारतत्त्वम् ॥

पूर्णबीजः, पुं, (पूर्णं बीजं यस्य ।) बीजपूरः । इति राजनिर्घण्टः ॥ (विवृतिरस्य बीजपूरशब्दे ज्ञातव्या ॥)

पूर्णमा, स्त्री, (पूर्णं कलापूर्णचन्द्रं पूरणं वा मातीति । मा + कः । टाप् । पूर्णिमा । इत्यमरटीकायां भरतः ॥

पूर्णमासः, पुं, (पूर्णमासी पूर्णिमा साधनत्वेनास्त्यस्येति । अच् ।) पौर्णमासयागः । इति जटाधरः ॥ (यथा, तैत्तिरीयसंहितायाम् । २ । २ । १० । २ ।
“वै तिष्यः सोमः पूर्णमासः साक्षादेव ब्रह्मवर्चसमवरुन्धे ॥”)
पूर्णो मासो यत्रेति । पूर्णिमा । यथा, महाभारते । १२ । २६ । ११४ ।
“दर्शे च पूर्णमासे च चातुर्मास्ये पुनः पुनः ।
अयजद्धयमेधेन सहस्रं परिवत्सरान् ॥”)

पूर्णमासी, स्त्री, (पूर्णो मासश्चान्द्रमासो यत्र । गौरादित्वात् ङीष् ।) पूर्णिमा । इति शब्दमाला ॥

पूर्णा, स्त्री, (पूर्ण + टाप् ।) पञ्चमी । दशमी । पूर्णिमा । अमावस्या । यथा,—
“नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात् ॥”